## पाठः - २ डो. पि.के. नारायणपिल्ला

### आमुखम्

अस्माकं देशः बहूनां महात्मनां जन्मभूमिः भवति। एते महात्मानः अस्माकं समाजे बहूनि परिवर्तनानि अकुर्वन् कुर्वन्ति च। सामूहिकसांस्कारिकमण्डले तेषां योगदर्शनम् अमूल्यम् एव। अद्यतनकाले तान् प्रति ज्ञानम् अनिवार्यमेव। अतः एव अस्माकं पाठ्यपद्धत्यां कस्यचन महात्मनः जीवनचरितं प्रतिपाद्यते।

| आशयाः / धारणाः व्यवहाररूपाणि | पठनप्रवर्तनानि पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| जीवनचरितं पठित्वा महात्मनां योगदानमधिकृत्य ज्ञानम्। | पदानां अर्थलेखनम्। अव्ययानां लेखनम्। जीवनचरितलेखनं, संख्यानाम् अक्षरैः लेखनम्। | पदानाम् अर्थं विवेचयति। अव्ययपदानां वाक्येषु योजनम्। संख्याम् अक्षरैः |
| भाषणं, लेखनं, वाचनम्। | क्रियापदलेखनम्। | लिखति। क्रियापदानां चयनं करोति। |

उद्देश्यम् - महात्मनां योदगदानमधिकृत्य ज्ञानम्।

पठननैपुणी - भाषणं, लेखनं, विवेचनम्।

आधारग्रन्थसूची - विश्वभानुः, मयूरदूतम्, जीवनचरितग्रन्थाः।

कालांशः - १०

**पठनप्रवर्तनम् - १ - वर्षाणां अक्षरैः लेखनम्।**

**उद्देश्यम्** - **संख्याज्ञानम्।**

**प्रक्रिया -**

अध्यापकः कक्ष्यां प्रविश्य अभिवादनप्रत्यभिवादनानन्तरं महात्मनां नामानि परिचाययतु। उदा - महात्मागान्धी, डा. अब्दुल्कलाम् आसाद्, स्वामिविवेकानन्दः, चट्टम्पिस्वामी इत्यादयः। अनन्तरं केरलीयानां संस्कृतपण्डितानां नामानि वदतु। श्रीशङ्कराचार्यः, डो.के. एन् एषुत्तच्छन्, डो. पी. के नारायणपिल्ला इत्यादयः।

ततः अध्यापकः छात्रान् सङ्घान् करोतु। पञ्चषाणां महात्मनां नामानि चार्ट्पत्रे विलिख्य छात्रेभ्यः ददातु। लब्धे चार्ट्पत्रे कस्य महात्मनः नाम इति पृच्छतु। छात्राः तम् अधिकृत्य द्वित्राणि वाक्यानि वदन्तु। अध्यापकेन अवश्यं साहाय्यं च दादव्यम्। अध्यापकः तव जन्मदिनं कदा भविष्यति इति पृच्छतु। छात्राः वदन्ति। अध्यापकः छात्रोक्तं संस्कृतेन परिवर्त्य श्यामफलके लिखतु। एवं पुनः पाठभागं सम्यक् वाचयित्वा वर्षाणां संख्याचयनाय निर्दिशतु छात्राः कक्ष्यायां अवतारयतु। वर्षाणां संख्या संस्कृताक्षरैः लेखनाय प्रेरयतु। आवश्यकं साहाय्यं दातव्यम्। उचितं मूल्यनिर्णयमपि करोति।

| | | |
|---|---|---|
| यथा- | १९१० | दशोत्तरनवशताधिकसहस्रम्। |
| | १९५२ | द्विपञ्चाशदुत्तरनवशताधिकसहस्रम्। |
| | १९६० | षष्ट्युत्तरनवशताधिकसहस्रम्। |
| | २००० | द्विसहस्रम्। |
| | २००९ | नवाधिकद्विसहस्रम्। |

**मूल्यनिर्णयसूचिकाः**

संख्यानां अक्षरज्ञानम्।

अक्षराणां लेखनज्ञानम्।

संख्याकथननैपुणी।

**पठनप्रवर्तनम् - अव्ययपदचयनम्। वाक्ययोजनम्।**

**उद्देश्यम् - अव्ययज्ञानम्।**

**प्रक्रिया-**

अध्यापकः कक्ष्यां प्रविश्य कानिचन वाक्यानि वदतु ।

शिष्यः गुरूम् उपगम्य संशयम् अपृच्छत्।

छात्राः अध्यापकं पुनः पुनः कथाकथनाय प्रेरयामासुः। ............इत्यादयः। वाक्ययेषु विद्यमानानां पदानि विवेचयन्तु छात्राः। विवेचितानिपदानि श्यामफलके लिखतु अध्यापकः। ततः अध्यापकः उपगम्य, पुनः पुनः इत्येते अव्ययपदे इति परिचाययति। ततः अव्ययमधिकृत्य वदतु।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।

वचनेषु च सर्वेषु यन्नव्येति तदव्ययम्।

पुल्लिङ्ग - स्त्रीलिङ्ग - नपुंसकलिङ्गेषु सप्तसु विभक्तिषु एक- द्वि- बहुवचनेषु च यत् न व्येति तद् अव्ययम्।

उदा - अतः, पुनः, पुरा, एवं, एव, तत्र, अत्र, कुत्र, विना, अथ, न, यदा, तदा, यथा - तथा, यावत् - तावत्, यदि - तर्हि, कथं, कति, कानिचन इत्यादीनि।

अनन्तरं अध्यापकः पाठपुस्तकाद् अव्ययपदचयनाय वाक्ये प्रयोगाय च निर्दिशति।

**मूल्यनिर्णयसूचिकाः**

अव्ययपदचयनम्।

आशयावगमनम्।

वाक्यरचनासामर्थ्यम्।

**पठनप्रवर्तनम् - ३ - जीवनचरितलेखनम्।**

**उद्देश्यम् - महात्मनां जीवनचरितलेखनम्।**

**प्रक्रिया-**

अध्यापकः कक्ष्यां प्रविश्य सामाजिकपरिष्कर्तॄणां समाजसेवकानां संस्कृताभिज्ञानां च केरलीयानां जीवनचरितलेखनानि छायाचित्रसमाहारम्, चलनचित्रमुद्रिकाः, ध्वनिमुद्रिकाः, सान्द्रमुद्रिकाः इत्यादीनां साहाय्यमपि स्वीकृत्य देशीयैक्यप्रवर्धनाय कृतश्रमाणां निर्दिष्टाणां केरलीयानां परिचायनं करोतु। ततः

महात्मनां जीवनचरितस्य लेखनाय प्रेरयतु। महात्मनां जीवनचरिचसूचनाः चार्ट्पत्रे विलिख्य प्रदर्शयतु।

**मूल्यनिर्णयसूचिकाः**

चर्चा।

वाक्यघटना।

अवतारणम्।

**मातृका**

# विवेकानन्दः

| | | |
|---|---|---|
| नाम | - | नरेन्द्रः |
| जन्मतिथिः | - | १८६३। |
| जन्मदेशः | - | वङ्गदेशस्य कोल्कत्तानगरे। |
| पितरौ | - | विश्वनाथदत्तः, भुवनेश्वरीदेवी च। |
| गुरुः | - | श्रीरामकृष्णपरमहंसः। |
| योगदानम् | - | युवकान् प्राबोधयत् (युवकेषु आत्मीयबोधोत्पादनम्) |
| मृतः | - | १९०२ जूलै ४ |

नरेन्द्रः १८६३ (त्रिषष्टयधिकाष्टशतोत्तरसहस्र) तमे वर्षे बङ्गदेशस्य कोल्कत्तानगरे जनिम् अलभत। अस्य पिता विश्वनाथदत्तः माता भुवनेश्वरीदेवी च। तस्य यथार्थनाम नरेन्द्रः इति आसीत्। अस्य गुरुः श्रीरामकृष्णपरमहंसः आसीत्। अमेरिकादेशस्य चिक्कागो नगरे प्रवृत्ते सर्वधर्मसम्मेलने स्वभाषणेन

सः विश्वप्रसिद्धः अभवत्। गुराः स्मरणार्थं अनेन श्रीरामकृष्णमठं स्थापितम्। 'उत्तिष्ठत, जाग्रत, प्राप्यवरान्निबोधत' इति उपनिषद्वाक्येन सः युवकान् प्राबोधयत्। १९०२ (द्व्यधिकशतोत्तरसहस्र) तमे वर्षे जूलै मासस्य चतुर्थे दिनाङ्के दिवंगतः च।

## शङ्कराचार्यः

| | | |
|---|---|---|
| नाम | - | शङ्कराचार्यः |
| जन्मतिथिः | - | क्रिस्तोः परं AD ७८८ |
| जन्मदेशः | - | कालटिः। |
| पितरौ | - | शिवगुरुः, आर्याम्बा च। |
| योगदानम् | - | प्रस्थानत्रयभाष्यम्। |
| दिवंगतः | - | द्वात्रिंशत्वयसि। |

शङ्कराचार्यः क्रिस्तोः परम् AD ७८८ (अष्टाशीत्यधिकसप्तशत) तमे वर्षे केरलेषु कालटि नाम्नि ग्रामे जनिम् अलभत। शिवगुरुः आर्याम्बा च तस्य पितरौ। सः बाल्य एव सन्यासं स्वीचकार। गोविन्दभगवत्पादाचार्यस्य समीपं गत्वा तस्य शिष्यत्वं स्वीचकार। अद्वैतमतस्थापनाय तेन अनेके ग्रन्थाः विरचिताः। प्रस्थानत्रयम् इति प्रथितानां ब्रह्मसूत्र- भगवद्गीता- उपनिषदां भाष्यम् अनेन रचितम्। द्वात्रिंशत्तमेवयसि सः दिवंगतः।

## श्रीरामकृष्णपरमहंसः

| | | |
|---|---|---|
| नाम | - | श्रीरामकृष्णपरमहंसः |
| जन्मतिथि | - | १८३६ तमे वर्षे |
| जन्मदेशः | - | पश्चिमबङ्गेषु हूग्लीजिल्लायां कामारपुकुरग्रामे। |
| पितरौ | - | क्षुदिरा, चन्द्रमणी। |
| योगदानम् | - | अधःस्थितानां उद्धारणम्। |
| दिवंगतः | - | १८८६ आगस्त १६। |

श्रीरामकृष्णपरमहंसः पश्चिमबङ्गेषु हूग्लीजिल्लायां कामारपुकुरनामके ग्रामे १८३६ (षड्त्रिंशत्यधिकष्टशतोत्तर सहस्र) तमे वर्षे फिब्रवरि मासस्य अष्टादशे दिने जनिमलभत। क्षुदिरा नाम ब्राह्मणः अस्य पिता, माता चन्द्रमणी च। पितरौ तस्य गदाधरः इति नाम अकुरुताम्। बाल्ये एवायं स्वकीयासु चेष्टासु असाधारणीं प्रतिभां प्रकटयन् अवर्तत। तादात्मिकविद्याभ्यासः अस्मै न अरोचत। समूहे अधःस्थितानां उद्धारणाय तेषां परिचरणाय च अयं अयतत। १८८६ (षडशीत्यधिकाष्टशतोत्तरसहस्र) तमे वर्षे आगस्त्मासस्य षोडशे दिने अयं महात्मा महासमाधिं प्राप।

**पठनप्रवर्तनम् ४ - टिप्पणीलेखनम्।**

**उद्देश्यम् - टिप्पणीलेखने सामर्थ्यम्।**

**प्रक्रिया**

अध्यापकः छात्राणां चतुरः सङ्घान् करोतु। अथ श्रीनारायणगुरुः, चट्टम्पिस्वामी, स्वदेशाभिमानी रामकृष्णपिल्ला इत्यादीनां सामूहिकपरिष्कर्तॄणां योगदानम् अधिकृत्य चर्चां प्रचालयतु। सङ्घनेतारं आशयस्य अवतारणाय निर्दिशतु। अध्यापकः क्रोडीकृत्य श्यमाफलके लिखतु।

**मूल्यनिर्णयसूचिकाः**

चर्चा।

आशयचयनम्।

आशयावतारणम्।

अनन्तरं पाठपुस्तकं पठित्वा

नारायणपिल्लामहोदयस्य जीवनचक्रे संस्कृतस्य योगदानमधिकृत्य लघुटिप्पणीलेखनाय निर्दिशतु। लिखितानि अध्यापिका संशोधयतु। अनन्तरं छात्राणां आशयं क्रोडीकृत्य अध्यापकः श्यामफलके लिखतु।

यथा-

प्राथमिकविद्याभ्यासानन्तरं मद्रास् सर्वकलाशालातः बि.ए. बिरुदम् अवाप्य मुम्बै सर्वकलाशालायाः डोक्ट्रेट् बिरुदं सम्पादितवान्। पण्डितश्रेष्ठोऽयं केरलदेशं प्रत्यागत्य शिक्षामण्डले निमग्नोऽभूत्। सप्त वर्षाणि यावद् अनन्तपुर्यां संस्कृतकलाशालायां प्राचार्यपदमावहत्। तेन अनेके ग्रन्थाः रचिताः। तस्य ग्रन्थेषु विश्वभानुः, धर्मसागरः, चिदात्मस्तवम् इत्यादीनि प्रसिद्धानि सन्ति। केरलसर्वकारैः सः संस्कृतसर्वकलाशालायाः स्थापनार्थम् एकाङ्गसमितित्वेन नियुक्तः च।

**अधिकविस्तरः**

**स्वदेशाभिमानी रामकृष्णपिल्ला**

१८७८ (अष्टसप्तत्यधिकाष्टशतोत्तरसहस्रतमे) वर्षे मेय्मासस्य १७ तमे दिने नेय्याट्टिन्करदेशे जनिम् अलभत। तस्य पिता नरसिंहपोट्टी, माता चत्तियम्मा च। विद्याभ्यासानन्तरं सः पत्रप्रवर्तने व्यापृतः आसीत्। रामानुजन्, केरलदर्पणम्, केरलविपञ्चिका मलयाली इत्यादीनां पत्रिकाणां पत्रिकाकारः आसीत्। स्वदेशाभिमानीपत्रस्य पत्रिकाधिपत्यं स्वीकृतवानयं स्वदेशाभिमानी इति नाम्ना प्रथितोऽभूत्। कारल्मार्क्स्, सोक्रट्टीस् केरलभाषोत्पत्तिः इत्यादीनि बहूनि पुस्तकानि तेन रचितानि। १९१६ (षोडशाधिकनवशतोत्तरसहस्र) तमे मार्च्मासस्य २८ (अष्टविंशति)तमे दिने सः दिवंगतः